শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৰেঙ্কটনাথার্যঃ কৰিতার্কিককেসরী।
ৰেদান্তাচার্যৰর্যো মে সন্নিধত্তাং সদা হৃদি॥

# ॥শ্রীহযগ্রীৰাষ্টোত্তরশতনামস্তোত্রম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥ শ্ৰীহযগ্ৰীৱাষ্টোত্তরশতনামস্তোত্রম্ ॥

শৃণ্ৱন্তু ঋষযঃ সর্ৱে হযস্যাষ্টোত্তরং শতম্।
হযগ্ৰীৱো মহাৱিষ্ণুঃ কেশৱো মধুসূদনঃ॥ ১ ॥

গোৱিন্দঃ পুণ্ডরীকাক্ষো ৱিষ্ণুর্ৱিশ্বম্ভরো হরিঃ।
আদিত্যঃ সর্ৱৱাগীশঃ সর্ৱাধারঃ সনাতনঃ॥ ২ ॥

নিরাধারো নিরাকারো নিরীশো নিরুপদ্ৰৱঃ।
নিরঞ্জনো নিষ্কলঙ্কো নিত্যতৃপ্তো নিরামযঃ॥ ৩ ॥

চিদানন্দমযঃ সাক্ষী শরণ্যঃ সর্ৱদাযকঃ।
শ্ৰীমান্ লোকত্রযাধীশঃ শিৱঃ সারস্বতপ্ৰদঃ॥ ৪ ॥

ৱেদোদ্ধর্তা ৱেদনিধির্ৱেদৱেদ্যঃ প্ৰভূত্তমঃ।
পূর্ণঃ পূরযিতা পুণ্যঃ পুণ্যকীর্তিঃ পরাতপরঃ॥ ৫ ॥

পরমাত্মা পরঞ্জ্যোতিঃ পরেশঃ পারগঃ পরঃ।
সর্ৱৱেদাত্মকো ৱিদ্বান্ ৱেদৱেদান্তপারগঃ॥ ৬ ॥

সকলোপনিষদ্বেদ্যো নিষ্কলঃ সর্ৱশাস্ত্ৰকৃত্।
অক্ষমালাজ্ঞানমুদ্ৰাযুক্তহস্তো ৱরপ্ৰদঃ॥ ৭ ॥

পুরাণঃ পুরুষশ্ৰেষ্ঠঃ শরণ্যঃ পরমেশ্বরঃ।
শান্তো দান্তো জিতক্ৰোধো জিতামিত্ৰো জগন্মযঃ॥ ৮ ॥

জন্মমৃত্যুহরো জীৱো জযদো জাড্যনাশনঃ।
জপপ্ৰিযো জপস্তুত্যো জাপকপ্ৰিযকৃত্ প্ৰভুঃ॥ ৯ ॥

ৱিমলো ৱিশ্বরূপশ্চ ৱিশ্বগোপ্তা ৱিধিস্তুতঃ।
ৱিধীন্দ্ৰশিৱসংস্তুত্যঃ শান্তিদঃ ক্ষান্তিপারগঃ॥ ১০ ॥

শ্ৰেযঃপ্ৰদঃ শ্ৰুতিমযঃ শ্ৰেযসাংপতিরীশ্বরঃ।
অচ্যুতোনন্তরূপশ্চ প্ৰাণদঃ পৃথিৱীপতিঃ॥ ১১ ॥

www.prapatti.com

অৱ্যক্তো ৱ্যক্তরূপশ্চ সর্ৱসাক্ষী তমোহরঃ।
অজ্ঞাননাশকো জ্ঞানী পূর্ণচন্দ্রসমপ্রভঃ॥ ১২ ॥

জ্ঞানদো ৱাকপতির্যোগী যোগীশঃ সর্ৱকামদঃ।
মহাযোগী মহামৌনী মৌনীশঃ শ্রেযসাংপতিঃ॥ ১৩ ॥

হংসঃ পরমহংসশ্চ ৱিশ্বগোপ্তা ৱিরাট্ স্বরাট্।
শুদ্ধস্ফটিকসঙ্কাশো জটামণ্ডলসংযুতঃ॥ ১৪ ॥

আদিমধ্যান্তরহিতঃ সর্ৱৱাগীশ্বরেশ্বরঃ।
নাম্নামষ্টোত্তরশতং হযগ্রীৱস্য যঃ পঠেত্॥ ১৫ ॥

ৱেদৱেদাঙ্গৱেদান্তশাস্ত্রাণাং পারগঃ কৱিঃ।
ৱাচস্পতিসমো বুদ্ধ্যা সর্ৱৱিদ্যাৱিশারদঃ॥ ১৬ ॥

মহদৈশ্বর্যমাসাদ্য কলত্রাণি চ পুত্রকান্।
অৱাপ্য সকলান্ ভোগান্ অন্তে হরিপদং ৱ্রজেত্॥ ১৭ ॥

॥ ইতি শ্রীহযগ্রীৱাষ্টোত্তরশতনামস্তোত্রং সংপূর্ণম ॥

www.prapatti.com